अङ्क-२५
जनवरी-जून २०१५

**वेदविद्या**
ISSN-2230-8962

# शाङ्कराद्वैतदर्शने वैदिकप्रभावः

**डॉ. सदानन्द त्रिपाठी**

विराट्पुरुषपरमात्मनः श्वासोच्छ्वासनिःश्वसिता अपौरुषेया वेदास्सन्ति ऋग्यजुस्सामाथर्वाभिधाः। एतेषु समग्रं ज्ञानविज्ञानसहितमध्यात्मतत्त्वविज्ञानं विशदरूपेण विवेचितं वरीवर्त्ति। वेदानाम् अन्तः अन्तिमो भाग उपनिषन्नाम्ना प्रथितो 'वेदान्त' इति कथ्यते, किन्त्वितोऽप्यधिका समीचीना व्युत्पत्तिर्भवति यद्वेदानाम् अन्तः सारभूतः स्वारस्योपेतः रसरहस्ययुक्तश्च भागो विद्यते वेदान्तः। वेदान्तप्रस्थानं भारतीयदर्शनस्याधारस्रोतः। जीवब्रह्मणोरद्वैतत्वप्रतिपादनमस्य प्रमुखं प्रयोजनम्।

ऐतिहासिकदृष्ट्या सप्रमाणम् अधुनातः २५२४ वर्षपूर्वम् अर्थात् २६३१ तमे युधिष्ठिरराज्यसंवत्सरे, २५९३ तमे कलिसंवत्सरे, विक्रमसंवत्सरस्य ४५२ वर्षपूर्वं तदनुसारं ख्रिस्ताब्दात् ५०९ वर्षपूर्वं भारतवर्षस्य केरलप्रान्तस्य 'कालटी' नाम्नि ग्रामे श्रीशिवगुरुनाम्नो नम्बूदरीपादब्राह्मणदम्पतीगृहे प्रादुर्भूतः साक्षाच्छिवावतारः, षण्मतसंस्थापनाचार्यो **जगद्गुरुरादिशङ्कराचार्य्यभगवत्पादः**।[1] सत्यसनातन-वैदिकधर्म-संस्कृति-सभ्यतासंरक्षणाय, राष्ट्रियैक्यमखण्डतासंरक्षणाय चाचार्यवर्येण पुण्यभूमेर्भारतस्य चतुर्षु दिक्षु चतुर्णां मठानां संस्थापनाऽपि विहिता। चार्वाकजैनबौद्धप्रभृतिनास्तिकसम्प्रदायाचार्याणां मुखमर्दनं कृतं शास्त्रार्थपरम्परया। प्रस्थानत्रय्यां परिगणितानामुपनिषच्छ्रीमद्भगवद्गीताब्रह्मसूत्रादीनां वैदुष्यपूर्णं प्राञ्जलञ्च भाष्यं प्रणिनाय श्रीमदादिशङ्कराचार्य्यः।

भगवता श्रीकृष्णाद्वैपायनबादरायणवेदव्यासेन लोकानुग्रहकाङ्क्षयैव हि वेदान्तदर्शनसिद्धान्त-प्रतिपादकं **'ब्रह्मसूत्रम्'** इत्याख्यं ग्रन्थरत्नमद्वयतत्त्वावबोधाय प्रणीतम्। पदातिरेव भारतवर्षस्य तीर्थयात्राक्रमे हिमालयक्षेत्रे गतवति श्रीशङ्कराचार्ये तत्समक्षमात्मानमुपस्थाप्य भगवान् वेदव्यासः ब्रह्मसूत्रोपरि भाष्यं विधातुं प्रेरितवान्। 'आज्ञा गुरूणां ह्यविचारणीये'ति मत्वा श्रीशङ्करार्य्येण हृद्यानवद्यशैल्यां **'शारीरकभाष्यम्'** इति सन्दृब्धम्। 'शाङ्करभाष्य'मित्युपाह्वेन विश्वविश्रुतेऽत्र ब्रह्मसूत्रे सृष्ट्युत्पत्तिः, ब्रह्मजीवजगत्-ईश्वर-माया-मोक्षः-जीवब्रह्मणोरद्वैतं, पञ्चीकरणमित्यादीनि बहूनि तत्त्वानि वैदिकवाङ्मयप्रमाणपुरस्सरं विवेचितानि सन्ति भगवत्पादेन। जानीमो वयं सर्वे यद् वेदान्तदर्शन-राद्धान्ताः सविशेषमुपनिषत्सु प्रमाणरूपेण वर्णिताः विद्यन्ते।[2] पुनरपि निगमागमशास्त्रविचक्षण-

[1] श्रीशङ्कराचार्य, पृष्ठं २९४, आचार्यबलदेव उपाध्यायः; **शङ्करावतरणम्,** पृष्ठं ८, १५ तः २४ पर्यन्तम्; प्रधानसम्पादकः स्वामिश्रीज्ञानानन्दसरस्वती परिव्राजकः, काशी, विक्रमाब्दः २०६१

[2] 'वेदान्तो नामोपनिषत्प्रमाणम्' - सदानन्दयतिः, वेदान्तसारः

पारदृश्वनः आदिशङ्कराचार्य्यमहाभागस्य वेदस्य संहिताब्राह्मणमारण्यकविषयकमगाधं गम्भीरज्ञानं तस्यालौकिकत्वं विद्वत्वं परिचाययति ।

ब्रह्मसूत्रशाङ्करभाष्यमवलम्ब्य **"शाङ्कराद्वैतदर्शने वैदिकप्रभावः"** इति शीर्षकं प्रकृतं शोधपत्रं यथामतिस्तत्रभवतां श्रीमतां विद्वद्धौरेयाणां समक्षं सविनयं समुपस्थाप्यते । तावत्प्र**थमं** जीवब्रह्मणोरैक्य-प्रतिपादनविषये विमृशामः। ब्रह्मसूत्रकारो विज्ञानात्मपरमात्मनोर्विशेषणं स्वीकृत्य तदर्थं सूत्रयति- **'विशेषणाच्च'**[३]। अत्र भगवत्पादादिशङ्कराचार्य्यः स्वीये शारीरकभाष्ये विवृण्वन् आह - 'विशेषणं च विज्ञानात्मपरमात्मनोरेव भवति ।.... कथं तर्हि सर्वसंसारधर्मातीतो ब्रह्मस्वभावश्चैतन्यमात्रस्वरूपः '**अनश्नन्नन्योऽभिचाकशीति**'।[४] ऋङ्मन्त्रस्यास्य प्रतीकस्य पूर्णस्वरूपमेवंविधं वर्त्तते ;-

द्वा सु॒प॒र्णा स॒युजा॒ सखा॑या समा॒नं वृ॒क्षं परि॑ षस्वजाते ।
तयो॑र॒न्यः पिप्प॑लं स्वा॒द्वत्त्यन॑श्नन्न॒न्यो अ॒भि चा॑कशीति ॥[५]

'वेदार्थप्रकाशः' इत्याख्यं भाष्यं प्रकुर्वन्नाह सायणाचार्यः - 'अत्र लौकिकपक्षद्वयदृष्टान्तेन जीवपरमात्मानौ स्तूयेते ।[६] यथा लोके द्वौ सुपर्णौ सुपतनौ शोभनगमनौ सयुजा समानयोगौ सखाया समानख्यानौ समानं वृक्षं परि षस्वजाते एकमेव वृक्षं परिषस्वजाते आश्रयतः तयोरन्य एकः पिप्पलं पक्वं स्वादुतरमत्ति अपरोऽनश्नन्नभि चाकशीति अभिपश्यति तद्वद्वौ सुपर्णस्थानीयौ क्षेत्रज्ञपरमात्मानौ सयुजा समानयोगौ । योगो नाम सम्बन्धः स च तादात्म्यलक्षणः। स एवात्मा जीवात्मनः स्वरूपं यस्य परमात्मन स तदात्मा । एवमन्यस्यापि स एवात्मा परमात्मनः स्वरूपं यस्य जीवात्मनः। एवमेकस्वरूपावित्यर्थः।.....

**(२)** द्वितीयस्तु - यदा प्रश्नः समुदेति यत् किम् अग्निरत्ता (भोक्ता) भवति ? उत वा जीवः, अथवा परमात्मा ? तत्रायं समाधिः प्रस्तौति ब्रह्मसूत्रकारः सूत्रमाध्यमेन - **'अत्ता चराचरग्रहणात्'**[७] सूत्रस्यास्य भाष्यं प्रस्तुवन् शारीरकभाष्यकारः कथयति - '...... अत्र कश्चिदोदनोपसेचनसूचितोऽत्ता प्रतीयते । तत्र किमग्निरत्ता स्यात्, उत जीवः, अथवा परमात्मेति संशयः। विशेषानवधारणात् । त्रयाणां चाग्निजीवपरमात्मनामस्मिन्ग्रन्थे प्रश्नोपन्यासोपलब्धेः । किं तावत्प्राप्तम् । अग्निरत्तेति । कुतः, **'अग्निरन्नादः'** (बृहदारण्यकम् १.४.६) इति श्रुतिप्रसिद्धिभ्याम् । जीवो वात्ता स्यात्, **'तयोरन्यः पिप्पलं स्वाद्वत्ति'** इति दर्शनात् । न परमात्मा **'अनश्नन्नन्योऽअभिचाकशीति'**[८] (मुण्ड. ३.१.१) इति दर्शनादित्येवं

---

[३] ब्रह्मसूत्रम् १.२.१२
[४] ब्रह्मसूत्रम् १.२.१२ शाङ्करभाष्यम्
[५] ऋग्वेदसंहिता १.१६४.२०; अथर्ववेदसंहिता ९.९.२०
[६] ऋग्वेदसंहिता १.१६४.२० सायणभाष्यम्
[७] ब्रह्मसूत्रम् १.२.९; द्वितीयम् अत्त्रधिकरणम्
[८] ऋग्वेदसंहिता १.१६४.२०; अथर्ववेदसंहिता ९.९.२०

प्राप्ते ब्रूमः - अत्तात्र परमात्मा भवितुमर्हति ।[९].....

पूर्वमेवास्य ऋङ्मन्त्रस्य चर्चा कृता वर्त्तते, अत एव विस्तरभिया न विस्तार्यते ।

(३) ब्रह्मसूत्रग्रन्थस्याष्टमे देवताधिकरणे सूत्रमस्ति - 'अतएव च नित्यत्वम्'[१०] - प्रकृतेऽस्मिन् सूत्रेऽपौरुषेयवेदस्य नित्यत्वं विनिर्दिष्टमस्ति । एतस्य वैदिकं प्रमाणमुपस्थापयन् कथयति भगवान् भाष्यकारः, - "स्वतन्त्रस्य कर्त्तुरस्मरणादिभिः स्थिते वेदस्य नित्यत्वे देवादिव्यक्तिप्रभवाभ्युपगमेन तस्य विरोधमाशङ्क्य 'अतः प्रभवात्' इति परिहृत्येदानीं तदेव वेदनित्यत्वं स्थितं द्रढयति - अतएव च नित्यत्वमिति । अतएव नियताकृतेर्देवादेर्जगतो वेदशब्दप्रभवत्वाद्वेदशब्दे नित्यत्वमपि प्रत्येतव्यम् ।[११]

तथा च मन्त्रवर्णः - **य॒ज्ञेन॑ वा॒चः प॑द॒वीय॑माय॒न् तामन्व॑विन्द॒न्नृषि॑षु॒ प्रवि॑ष्टाम् ।**
**तामा॒भृत्या॒ व्य॑दधुः पुरु॒त्रा तां स॒प्त रे॒भा अ॒भि सं न॑वन्ते ॥**[१२]

इति स्थितामेव वाचमनुविन्नां दर्शयति । वेदव्यासश्चैवमेव स्मरति -

**युगान्तेऽन्तर्हितान्वेदान्सेतिहासान् महर्षयः ।**
**लेभिरे तपसा पूर्वमनुज्ञाताः स्वयम्भुवा ॥**[१३] **इति ॥**

(४) शाङ्कराद्वैतदर्शनम् **'उपपद्यते चाप्युपलभ्यते च'**(ब्र.सू.२.१.३६) इति ब्रह्मसूत्रमनुसृत्य संसारस्यानादित्वम् उररीकरोति। एवमेव, भगवान्बादरायणः समाननामरूपत्वविषये सूत्रयति **'समाननामरूपत्वाच्चावृत्तावप्यविरोधो दर्शनात्स्मृतेश्च'**[१४] अत्र शारीरकभाष्यकार आह - '......अतश्च सर्वकल्पानां तुल्यव्यवहारत्वात् कल्पान्तरव्यवहारानुसन्धानक्षमत्वाच्चेश्वराणां समाननामरूपा एव प्रतिसर्गं विशेषाः प्रादुर्भवन्ति । समाननामरूपत्वाच्चावृत्तावपि महासर्गमहाप्रलयलक्षणायां जगतोऽभ्युपगम्यमानायां न कश्चिच्छब्दप्रामाण्यादिविरोधः समाननामरूपतां च श्रुतिस्मृती दर्शयतः -

**सू॒र्या॒च॒न्द्र॒मसौ॑ धा॒ता य॑थापू॒र्वम॑कल्पयत् । दिवं॑ च पृथि॒वीं चा॒ऽन्तरि॑क्ष॒मथो॒ स्वः॑ ३ ॥**[१५]

इति । यथा पूर्वस्मिन् कल्पे सूर्याचन्द्रमःप्रभृति जगत्कॢप्तं तथास्मिन्नपि कल्पे परमेश्वरोऽकल्पयदित्यर्थः

तथा - **'अग्निर्वा अकामयत अन्नादो देवाना ९ स्यामिति ।**
**स एतमग्नये कृत्तिकाभ्यः पुरोडाशमष्टाकपालं निरवपत् ॥**[१६]

---

[९] ब्रह्मसूत्रम् १.२.९; (द्वितीयम् अत्त्रधिकरणम्); शाङ्करभाष्यम्
[१०] ब्रह्मसूत्रम् १.३.२९; अष्टमं देवताधिकरणम्
[११] ब्रह्मसूत्रम् १.३.२९ शाङ्करभाष्यम्
[१२] ऋग्वेदसंहिता १०.७१.३
[१३] ब्रह्मसूत्रकारः भगवान् वेदव्यासः
[१४] ब्रह्मसूत्रम् १.३.३०; अष्टमं देवताधिकरणम्
[१५] ऋग्वेदसंहिता १०.१९०.३; तै. आरण्यकम् १०.१.१४
[१६] तैत्तिरीयब्राह्मणम् ३.१.४.१

इति नक्षत्रेष्टिविधौ योऽग्निर्निरवपद्यस्मै वाग्नये निरवपत्तयोः समाननामरूपतां दर्शयतीत्येवंजातीयका श्रुतिरिहोदाहर्त्तव्या' ।[१७]

(५) आर्षपरम्परासम्प्राप्तः सनातनाद्वैतवेदान्तः श्रुतिप्रामाण्येन सहैव स्मृतिप्रामाण्यमपि स्वीकरोति श्रुतिवचनानुरोधेन । एतदर्थं ब्रह्मसूत्रकारेण सूत्रितम् - **'स्मृत्यनवकाशदोषप्रसङ्ग इति चेन्नान्यस्मृत्यनवकाशदोषप्रसङ्गात्'**[१८] इत्यत्र भाष्यं कुर्वाणेनाचार्यशङ्करेण समाधीयते- 'विप्रतिपत्तौ च स्मृतीनामवश्यकर्त्तव्येऽन्यतरपरिग्रहेऽन्यतरपरित्यागे च श्रुत्यनुसारिण्यः स्मृतयः प्रमाणमनपेक्ष्या इतराः।..... अन्यार्थदर्शनस्य च प्राप्तिरहितस्यासाधकत्वात् ।[१९] भवति चान्या मनोर्माहात्म्यं प्रख्यापयन्ती श्रुतिः -

**'..... यद्वै किञ्च मनुरवदत् तद्भेषजम् ।'**[२०]

श्रीमच्छङ्कराचार्यमहाभागः श्रुतिमेव परतमं प्रमाणम्, एवमेव च परमेश्वरं सर्वोपरि शक्तिं मनुते । सर्वे प्राणिनस्तस्येश्वरस्य पराधीनाः। ब्रह्मसूत्रस्य परायत्ताधिकरणे सूत्रमस्ति - **'परात्तु तच्छ्रुतेः**।[२१] सूत्रस्यास्य भाष्यं प्रकुर्वन्नाहाचार्यशङ्करः 'परात्' इति । अविद्यावस्थायां कार्यकरणसङ्घाताविवेकदर्शिनो जीवस्याविद्यातिमिरान्धस्य सतः परस्मादात्मनः कर्माध्यक्षात्सर्वभूताधिवासात् साक्षिणश्चेतयितुरीश्वरात्तदनुज्ञया कर्त्तृत्वभोक्तृत्वलक्षणस्य संसारस्य सिद्धिः; तदनुग्रहहेतुकेनैव च विज्ञानेन मोक्षसिद्धिर्भवितुमर्हति । कुतः ? तच्छ्रुतेः । यद्यपि दोषप्रयुक्तः सामग्रीसम्पन्नश्च जीवः, यद्यपि च लोके कृष्यादिषु कर्मसु नेश्वरकारणत्वं प्रसिद्धं, तथापि सर्वास्वेव प्रवृत्तिष्वीश्वरो हेतुकर्त्तेति श्रुतेरवसीयते ।[२२] तथाहि श्रुतिर्भवति - **"एष ह्येवैनं साधुकर्मकारयति तं यमेभ्यो लोकेभ्य उन्निनीषते। एष ह्येवैनमसाधु कर्म कारयति तं यमधो निनीषते ।"**[२३]

भाष्यस्य भावार्थोऽयं विद्यते यत्परमेश्वरः साधुमहापुरुषैः श्रेष्ठकर्म्माचरणं कारयित्वा तान् प्रति सार्ष्टिसामीप्यसारूप्यसालोक्यसायुज्यप्रभृतयो मुक्तयः प्रददाति, तथा चासुरीस्वभावापन्नैर्जनैर्दुष्कर्म कारयित्वा तान् नानाविधनरकान् प्रति सम्प्रेषयतीति निश्चप्रचम् ।

डॉ. सदानन्द त्रिपाठी
शासकीय : संस्कृतमहाविद्यालयः,
उज्जयिनी (म.प्र.) ४५६००१

[१७] ब्रह्मसूत्रम् १.३.३० शाङ्करभाष्यम्
[१८] ब्रह्मसूत्रम् २.१.१ स्मृत्यधिकरणम्
[१९] ब्रह्मसूत्रम् २.१.१ शाङ्करभाष्यम्
[२०] तैत्तिरीयसंहिता काण्डः २ / प्रपाठकः २/ अनुवाकः १० / ऋचा २; इष्टिविधानम्
[२१] ब्रह्मसूत्रम् २.३.४१; षोडशतमं परायत्ताधिकरणम्
[२२] ब्रह्मसूत्रम् २.३.४१ शाङ्करभाष्यम्
[२३] ऋग्वेदीयकौषीतकिब्राह्मणम् ३.८